# Shri Rajarajeshvari Stuti or Rajarajeshvaryashtakam

# श्रीराजराजेश्वर्याः स्तुतिः अथवा राजराजेश्वर्यष्टकम्

## Document Information


Text title : Shri Rajarajeshvari Stuti or Rajarajeshvaryashtakam

File name : rAjarAjeshvaryaShTakam.itx

Category : devii, dashamahAvidyA, aShTaka

Location : doc_devii

Author : rAjAnaka vidyAdhara

Transliterated by : Girdhari Lal koul glkoul.18 at gmail.com

Proofread by : Girdhari Lal koul glkoul.18 at gmail.com

Latest update : November 30, 2019

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.



November 30, 2019

*sanskritdocuments.org*

# श्रीराजराजेश्वर्याः स्तुतिः अथवा राजराजेश्वर्यष्टकम्

ॐ नमः पराशक्तये ।
आदिक्षान्त समस्तवर्णविभवा यामातृकारूपिणी
मन्त्रवीर्य परामृतरसा स्वादात्सुखदायिनी ।
भावव्रात समुद्रगर्भलहरी शब्दार्थतत्त्वव्यापिनी
सा मां पातु सरस्वती भगवती श्रीराजराजेश्वरी ॥ १॥

वाच्य वाचक सारपूर्ण विभवा देवी षडध्वाश्रया
श्रीचक्रान्तरवह्निकोण निलयाया बिन्दुमात्रात्मिका ।
सूक्ष्मात्सूक्ष्मतरा परामृतमयी नित्यं जगत्तर्पिनी
सा मां पातु सरस्वती भगवती श्रीराजराजेश्वरी ॥ २॥

पूर्णाहन्त्वविमर्श पावनकरी नित्यं मलक्षालिनी
भक्तानां भवभीति भञ्जनकरी हृत्पङ्कजे संस्थिता ।
बाह्याभ्यन्तरचारिणी सुरसतो हंसेनया सेविता
सा मां पातु सरस्वती भगवती श्रीराजराजेश्वरी ॥ ३॥

उर्ध्वाधः स्थितनाडिवृन्दविभवे सञ्जीविकामध्यमा
स्वात्मामर्शन तत्परैश्च सततं भक्तैः खलु प्राप्यते ।
मूलाद् ब्रह्मबिलावधितडिदिवया ब्रह्मनाडी स्मृता
सा मां पातु सरस्वती भगवती श्रीराजराजेश्वरी ॥ ४॥

वर्णावर्णनिवर्ण भेद निवहातत्राप्यभेदात्मिका
वेदान्तागमतन्त्र सार महिमाषड्दर्शनोल्लङ्घिनी ।
सर्वाचार विचार पालन परायानिर्गता चारका
सा मां पातु सरस्वती भगवती श्रीराजराजेश्वरी ॥ ५॥

ॐ तत्सदितिनामभिर्निगदिता सर्वागमे योगिभिः
तत्प्राणान्त विचार्यभक्त निबहैः ह्वीतमिव शष्पवत् ।
ऐन्द्रं-धाम विहाय क्षीणकलुषैर्मोक्षाय या स्वीकृता

सा मां पातु सरस्वती भगवती श्रीराजराजेश्वरी ॥ ६॥

सौरं ज्योतिरिदमपि परिमितंह्वीतं तथा यत्पदात्
ॐइत्येतद्विमर्शनेन सततं सर्वमिदं स्वात्मनि ।
रक्तेस्तत्पद् प्रेप्सुभिश्च मुनिभिःस्वस्थै सदास्वीकृतं
सा मां पातु सरस्वती भगवती श्रीराजराजेश्वेरी ॥ ७॥

तैस्त्तैर्योगिवरैः सदा कवियशोनक्रं दिनं यत्पद-
ध्यानावस्थित तद् गतेन मनसा प्राप्तं महत् निर्मलम ।
मोक्षं भोगं ददाति या प्रभुदिता विद्याधरैर्वन्दिता
सा मां पातु सरस्वती भगवती श्रीराजराजेश्वरी ॥ ८॥

इति श्रीराजराजेश्वर्याः स्तुतिः राजानक विद्याधर विरचिता शुभायास्तु ।
इति शिवम् ।

Encoded and proofread by Girdhari Lal koul glkoul.18 at gmail.com
Send corrections to sanskrit@cheerful.com

---

*Shri Rajarajeshvari Stuti or Rajarajeshvaryashtakam*
pdf was typeset on November 30, 2019

Please send corrections to *sanskrit@cheerful.com*